E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.312

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# ।।न्यायशास्त्रं परीक्षान्तम् उद्देशान्वितलक्षणम्।।

**-डॉ. सिद्धिदात्री भारद्वाज**

असिस्टेन्ट प्रोफेसर, संस्कृतविभाग:

कलासंकाय:, काशीहिन्दूविश्वविद्यालय: वाराणसी-५

शोधसारः– आचार्य - वात्स्यायन-उद्योतकर-वाचस्पति-उदयन-भासर्वज्ञ-जयन्तभट्ट-वरदराज-केशवमिश्रविश्वनाथ - प्रभृतिभि: प्रकृष्टै: मनीषिभि: प्रपूजितं महर्षिप्रवरगौतम-न्यायसूत्रम् पञ्चसु अध्यायेषु व्याप्नोति। अत्र प्रत्यध्यायम् आह्निकद्वयं प्रकल्पितं चकास्ति। दशाह्निकलसितेषु पञ्चसु अध्यायेषु आहत्य न्यायसूत्राणां संख्या-५२८ परिमिता विद्योतते। तत्र प्रमाणप्रमेयेत्यादिना प्रथमसूत्रेण षोडशपदार्थानां नामसंकीर्तनात्मा उद्देशो विहित: एतत्सहकृतेन द्वितीयेन 'दुःखजन्मेति'-सूत्रेण सक्रमा अपवर्गप्रातिरिति विनिवेदयता न्यायशास्त्रस्य अनुबन्धचतुष्टयं सुष्ठु प्रकाशितम्। अथ सूत्रषट्कं सप्रभेदस्य प्रमाणस्य लक्षणम् आवेदयति। तदनन्तरं चतुर्दशभि: सूत्रै: प्रकाशितानि आत्मप्रभृति अवपर्गपर्यन्तम् प्रमेय-द्वादशकलक्षणानि निष्कर्षात्मतयात्र विनिवेदितानि।

तदनु संशयप्रयोजनदृष्टान्तानां न्यायपूर्वाङ्गात्मकानां, क्रमेण सप्रभेदस्य न्यायाश्रयसिद्धान्तस्य लक्षण - सूत्राणि अवतार्य न्यायावयवानां सूत्रोक्तलक्षण-निष्कर्षप्रकाशनमत्र निबन्धे विहितम्। तर्कनिर्णययो:, कथाङ्गानां हेत्वाभासस्य छलादि-निग्रहस्थानपर्यन्तस्य पदार्थव्रातस्य लक्षणसूत्राणि उल्लिख्य समेषां लक्षणानां परीक्षात्मा या विचारणा विहिता तदीय - सूत्राणि वर्गीकृतानि। अवशिष्टानि तु शास्त्रपूरणात्मानि। शोधालेख एष आकरग्रन्थावगमे सोपानायितम् आस्ते।

कूटशब्दाः– ऋषिः निःश्रेयसम्, आह्निकम्, निग्रहस्थानम्, पूर्ववत्, शेषवत्, सामान्यतो दृष्टम्, आप्तः, प्रेत्यभावः, प्रवर्तना, सिद्धान्तः, न्यायवयवाः, वादः, जल्पः, वितण्डा हेत्वाभासः, साधर्म्यम्, वैधर्म्यम्, सन्निकर्षः, अर्थान्तरम्, श्रुतिः, प्रामाण्यम्, नियोगः, व्यक्तम्, सुषुप्तम्, रागः, भाष्यम्, वार्तिकम्, सूत्रम्, व्याख्या, टीका इत्यादिः।

न्यायसूत्रवृत्तिकृद् विश्वनाथः न्यायदर्शनप्रवर्तकम् ऋषिप्रवरम् तत्रभवन्तम् अक्षपादं भगवन्तं भास्कररूपतया, तदीयान् तर्कान् सूर्यकिरणतया आत्मप्रभृति अपवर्गपर्यन्तम् सर्वस्मिन् प्रमेये यद् मिथ्याज्ञानं तद्रूपम् आन्तरं ध्वान्तं रात्र्यन्धकारतया अथच श्रद्धालूनां सतां धर्मपरायणानां जाग्रतां 'तरति शोकमात्मविद्' इति श्रुतिशंसितानां 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।' इत्येवं स्वरूपां भावनां निःश्रेयसस्वरूपां भावयतः न्यायशास्त्रप्रवर्तकस्य कृते प्रह्वीभावम् आत्मनि धारयति।

तद्यथा–

**यदीयतर्ककिरणैरान्तरध्वान्तसन्ततिम् ।**

**सन्तस्तरन्ति भास्वन्तमक्षपादं नमामि तम् ।।**[1]

अथ न्यायमञ्जरीकृद् अत्रभवान् जयन्तभट्टः यदीयाः वाचः श्रीमद्भगवद्-महेश्वरानुग्रहपूताः न्यायरत्ननिदानभूताः, तम् मुनिप्रवरं श्रीगौतमं श्रद्धासुमनोभिः अर्चयतितमाम्-

**जयन्ति पुरजिद्-दत्तसाधुवाद-पवित्रिताः।**

**निदानं न्यायरत्नानाम् अक्षपादमुनेर्गिरः।।**[2]

ऋषिप्रवर- श्रीमदक्षपादप्रणीते न्यायसूत्रे पञ्च अध्यायाः सन्ति। प्रत्यध्यायम् आह्निकद्वयं विद्यते। अतः 5×2=10 आह्निकानि सन्ति। अत्र 528 सूत्राणि विद्यन्ते।

भवति किल न्यायशास्त्रस्य प्रवृत्तिः त्रिधा- 1. उद्देशः 2. लक्षणं 3. परीक्षा चेति। उद्देशो नाम नाममात्रेण वस्तुसंकीर्तनम्। लक्षणं नाम वस्तुनः लक्ष्यस्य यद् लक्षणं विधीयते तद् निर्दुष्टं विद्यते न वा- इति सम्यक् परीक्षणम्।

न्यासूत्रस्य प्रथमसूत्रेण शास्त्राभिमतानां षोडश - पदाथानां नामसंकीर्तनेन उद्देशो विहितः। द्वितीयसूत्रेण न्यायशास्त्रे प्रोक्तस्य उपायस्य यत् परमं प्रयोजनम्-

[1] न्यायसूत्रवृत्तिःमङ्गपद्यम्।

[2] न्यायमञ्जरीमङ्गलपद्यम्

अपवर्गप्राप्तिः, सा सक्रमा प्रतिपादिता। तदेवं सूत्राभ्याम् आभ्याम् न्याशास्त्रस्य अनबन्धचतुष्टयं प्रतिपादितं भवति। यथोक्तम्-

1. 'प्रमाण-प्रमेय-संशय-प्रयोजन - दृष्टान्त - सिद्धान्त - अवयव - तर्क - निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानाद् निःश्रेयसाधिगमः।' इति[3]

2. दुःखजन्मप्रवृत्ति-दोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायादपवर्गः।' इति च[4]

तदनन्तरं सप्रभेदस्य प्रमाणस्य लक्षणं सूत्रषट्केन विहितम्। तद्यथा-

1. प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।

2. इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम् अव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्।

3. अथ तत्पूर्वकं त्रिविधम् अनुमानं पूर्ववत् शेषवत् सामान्यतोदृष्टं च।

4. प्रसिद्धसाधर्म्यात् साध्यसाधनम् उपमानम्।

5. आप्तोपदेशः शब्दः।

6. स द्विविधो दृष्टादृष्टार्थत्वात्। इति[5]

प्रमाणानां लक्षणनिरूपणानन्तरं प्रमेयस्य द्वादशविधस्य लक्षणानि चतुर्दशभिः सूत्रैः प्रतिपादितानि। तद्यथा-

1.आत्म-शरीर-इन्द्रय-अर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःख-अपवर्गास्तु प्रमेयम्।

2. इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि आत्मनो लिङ्गम्।

3. चेष्टा-इन्द्रिय-अर्थाश्रयः शरीरम्।

4. घ्राण-रसन-चक्षुः त्वक्-श्रोत्राणि इन्द्रियाणि भूतेभ्यः।

5. पृथिवी-आपस्-तेजो वायुः आकाशम् इति भूतानि।

6. गन्ध-रस-रूप-स्पशर्शब्दाः पृथिव्यादिगुणाःतदर्थाः।

7. बुद्धिः- उपलब्धिःज्ञानम् इति अनर्थान्तरम्।

8. युगपद् ज्ञानानुत्पत्तिः मनसः लिङ्गम्।

---

[3] न्यायसूत्रम् 1/1/1

[4] तदेव- 1/1/2

[5] न्यायसूत्रम्-1-1-3-8

9. प्रवृत्तिः वाग्-बुद्धि-शरीरारम्भः।

10. प्रवर्तना-लक्षणा दोषाः।

11. पुनरुत्पत्तिः प्रेत्यभावः

12. प्रवृत्ति-दोष-जनितः अर्थःफलम्।

13. बाधना-लक्षणं दुःखम्।

14. तदत्यन्त-विमोक्षः अपवर्गः।[6]

तदनन्तरं न्यायपूर्वाङ्गस्वरूपाणां संशय-प्रयोजन-दृष्टान्तानां लक्षणं त्रिभिः सूत्रैः प्रतिपादितम्। तद्यथा-

1. समाना-नेक-धर्मो-पपत्तेः विप्रतिपत्तेः-उपलब्धि - अनुपलब्धि-अव्यवस्थातश्च विशेषा-पेक्षो विमर्शः संशयः।

2. यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्।

3. लौकिक-परीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः। इति[7]

तदनन्तरं न्यायाश्रयसिद्धान्तलक्षणं षड्भिः सूत्रैः प्रतिपादितम्।

तद्यथा-

1. तन्त्रा-धिकरणा-भ्युपगमसंस्थितिः सिद्धान्तः।

2. स चतुर्विधः सर्वतन्त्र-प्रतितन्त्र-अधिकरण-अभ्युपगमसंस्थिति-अर्थान्तरभावात्।

3. सर्वतन्त्राविरुद्धः तन्त्रेऽधिकृतः अर्थः सर्वतन्त्रसिद्धान्तः।

4. समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः।

5. यत्-सिद्धौ अन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः।

6. अपरीक्षिताभ्युपगमात् तद्-विशेष-परीक्षणम् अभ्युपगमसिद्धान्तः। इति[8]

तदनन्तरं न्यायावयवानां लक्षणम् अष्टाभिः सूत्रैः प्रतिपादितम्। तद्यथा-

1. प्रतिज्ञाहेतूदाहरणोपनयनिगमानि अवयवाः।

2. साध्यनिर्देशः प्रतिज्ञा।

3. उदाहरण-साधर्म्यात् साध्यसाधनं हेतुः।

4. तथा वैधर्म्यात्।

---

[6] तदेव 1/1/9-22

[7] न्यायसूत्रम् 1/1/23-25

[8] न्यायसूत्रम् - 1/1/26-31

5. साध्यसाधर्म्यात् तद्-धर्मभावी दृष्टान्त उदाहरणम्।

6. तद्विपर्ययाद् वा विपरीतम्।

7. उदाहरणापेक्षः तथेति उपसंहारो न तथेति वा साध्यस्योपनयः।

8. हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्। इति[9]

एतदनन्तरं न्यायोत्तराङ्गयोः तर्कनिर्णययोः लक्षणं प्रतिपादितम्। तद्यथा-

1. अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस् तत्त्वज्ञानार्थम् ऊहस् तर्कः।

2. विमृश्य पक्षप्रतिपक्षाभ्याम् अर्थावधारणं निर्णयः। इति[10] एतदनन्तरम् कथाङ्गानां वाद-जल्प-वितण्डानां लक्षणं त्रिभिः सूत्रैः प्रतिपादितम्। तद्यथा-

1. प्रधानतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः।

2. यथोक्तोपपन्नः छलजाति-निग्रहस्थान-साधनोपालम्भःजल्पः।

3. स प्रतिपक्षस्थापनाहीनः वितण्डा। इति[11]

एतदनन्तरं हेत्वाभास-प्रभेदानां लक्षणं षड्भिः सूत्रैः प्रतिपादितम्। तद्यथा-

1. सव्यभिचार-विरुद्ध-प्रकरणसम-साध्यसम-कालातीताः हेत्वाभासाः।

2. अनैकान्तिकः सव्यभिचारः।

3. सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः।

4. यस्मात् प्रकरणचिन्ता स निर्णयार्थम् अपदिष्टः प्रकरणसमः।

5. साध्याविशिष्टः साध्यत्वात् साध्यसमः।

6. कालात्ययापदिष्टः कालातीतः। इति[12]

एतदनन्तरम् छलस्य सप्रभेदस्य लक्षणम् अष्टाभिः सूत्रैः प्रतिपादितम्। तद्यथा-

1. वचनविघातोऽर्थविकल्पोपपत्त्या छलम्,

2. तत् त्रिविधं वाक्छलं, सामान्यच्छलम्, उपचारच्छलं चेति।

3. अविशेषाभिहितेऽर्थे वक्तुरभिप्रायाद् अर्थान्तरकल्पना वाक्छलम्।

4.सम्भवतः अर्थस्य अतिसामान्ययोगाद् असम्भूतार्थकल्पना सामान्यच्छलम्।

---

[9] न्यायसूत्रम् 1/1/32-39

[10] न्यायसूत्रम् - 1/1/40-41

[11] न्याससूत्रम् - 1/2/1-3

[12] न्यायसूत्रम्-1/2/4-9

5. धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेधः उपचारच्छलम्।

6. वाक्छलमेव उपचारच्छलं तदविशेषात्।

7. न, तदर्थान्तरभावात्।

8. अविशेषे वा किञ्चित् साधर्म्याद् एकच्छलप्रसङ्गः। इति[13]

एतदनन्तरं त्रिभिःसूत्रैः जाति-निग्रहस्थानयोः लक्षणं प्रतिपादितम्। तद्यथा-

1. साधर्म्य-वैधर्म्याभ्यां प्रत्यवस्थानं जातिः।

2. विप्रतिपत्तिः अप्रतिपत्तिश्च निग्रहस्थानम्।

3. तद्विकल्पाद् जातिनिग्रहस्थानबहुत्वम्। इति[14]

एतावता प्रथमाध्यायस्य द्वितीयाह्निकं यावद् एकेन सूत्रेण प्रमाणप्रमेयादीनां षोडशपदार्थानां नाममात्रेण वस्तुसंकीर्तनं नाम उद्देशं विधाय तेषां लक्षणमपि तदीयासाधारणधर्मकथनेन विहितम्। उद्दिष्टस्य प्रमाणादेः तत्त्वव्यच्छेदकं धर्मं नाम लक्षणं विधाय द्वितीयाध्यायः आरब्धः तत्र लक्षितस्य वस्तुनः लक्षणं युक्त्या उपपन्नं भवति नवेति प्रमाणैः यद् अवधारणं विधीयते-सेयं परीक्षा प्रारब्धा।

कथायाम् अनुमितौ च संशयस्य विचारारम्भे अत्यन्तम् उपादेयतया संशयलक्षणस्य परीक्षा निपुणं विहिता सूत्रसप्तकेन। तद्यथा-

1. समानानेकधर्माध्यवसायाद् अन्यतरधर्माध्यासाद्वा न संशयः।

2. विप्रतिपत्त्य-व्यवस्था-ध्यवसायाच्च।

3. विप्रतिपत्तौ च सम्प्रतिपत्तेः।

4. अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः।

5. तथाऽत्यन्तसंशयस् तद्धर्मसातत्योपपत्तेः।

6. यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा।

7. यत्र संशयस् तत्रैवम् उत्तरोत्तर-प्रसङ्गः। इति[15]

एतदनन्तरम् अन्वीक्षागर्भप्रमाणानां लक्षणमधिकृत्य निर्दोषत्व-प्रतिपादनफलिका परीक्षा विहिता त्रयोदशभिः सूत्रवाक्यैः।

तद्यथा-

---

[13] न्यायसूत्रम् 1/2/10-17

[14] न्यायसूत्रम् 1/2/18-20

[15] न्यायसूत्रम् - 2/1/1-7

1. प्रत्यक्षादीनाम् अप्रामाण्यं त्रैकाल्यासिद्धेः।

2. पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थ-सन्निकर्षात् प्रत्यक्षोत्पत्तिः।

3. पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः।

4. युगपत् सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम्।

5. त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः।

6. सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः।

7. तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः।

8. त्रैकाल्याप्रतिषेधश्च शब्दाद् आतोद्यसिद्धिवत् तत्सिद्धेः।

9. प्रमेया च तुलाप्रामाण्यवत्।

10. प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तर-सिद्धिप्रसङ्गः।

11. तद्-विनिवृत्तेर्वा प्रमाणान्तरसिद्धिवत् प्रमेयसिद्धिः।

12. न प्रदीप-प्रकाशवत् तत्-सिद्धेः।

13. क्वचिद् निवृत्ति-दर्शनाद् अनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः। इति[16]

तदनन्तरम् द्वादशभिः सूत्रैः प्रत्यक्षप्रमाणलक्षणपरीक्षा विहिता। तद्यथा-

1. प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात्।

2. नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः।

3. दिग्देशकालाकाशेष्वपि एवं प्रसङ्गः।

4. ज्ञानलिङ्गत्वाद् आत्मनो नानवरोधः।

5. तदयौगपद्य-लिङ्गत्वाच्च न मनसः।

6. प्रत्यक्षनिमित्तत्वाच्च इन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम्।

7. सुप्त-व्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्।

8. तैश्चापदेशो ज्ञानविशेषाणाम्।

9. व्याहतत्वाद् अहेतुः।

10. नार्थ-विशेष-प्राबल्यात्।

11. प्रत्यक्षम् अनुमानम् एकदेशग्रहणादुपलब्धेः।

12. न प्रत्यक्षेण यावत् तावदपि उपलम्भात्। इति[17]

---

[16] न्यायसूत्रम् - 2/1/8-20

तदनन्तरम् अवयविपदार्थलक्षणस्य प्रतिपादितचरस्य यौक्तिकत्वं निर्दोषत्वं च परीक्षाविधिना समीक्षितम् चतुर्भिः सूत्रैः।

तद्यथा-

1. साध्यत्वाद् अवयविनि सन्देहः।
2. सर्वाग्रहणम् अवयव्यसिद्धेः।
3. धारणाकर्षणोपपत्तेश्च।
4. सेनावनवद् ग्रहणमिति चेन्न, अतीन्द्रियत्वाद् अणूनाम्। इति[18]

तदनन्तरम् सूत्रद्वयेन अनुमानलक्षणस्य परीक्षा विहिता। तद्यथा-

1. रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानम् अप्रमाणम्।
2. नैकदेशत्राससादृश्येभ्यः अर्थान्तरभावात्। इति[19]

तदनन्तरम् पञ्चभिः सूत्रैः उपोद्घातसंगत्या वर्तमानपरीक्षा विहिता। तद्यथा-

1. वर्तमानाभावः पततः पतित-पतितव्यकालोपपत्तेः।
2. तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात्।
3. नातीतानागतयोरितरेतरापेक्षासिद्धिः।
4. वर्तमानाभावे सर्वाग्रहणम् प्रत्यक्षानुपपत्तेः।
5. कृतताकर्तव्यतोपपत्तेस्तूभयथाग्रहणम्। इति[20]

तदनन्तरम् उपमानप्रमाणपरीक्षा पञ्चभिःसूत्रैः विहिता। तद्यथा-

1. अत्यन्तप्रायैकदेशसाधर्म्याद् उपमानासिद्धिः।
2. प्रसिद्धसाधर्म्याद् उपमानसद्धेः यथोक्त-दोषानुपपत्तिः।
3. प्रत्यक्षेण अप्रत्यक्षसिद्धेः।
4. नाप्रत्यक्षे गवये प्रमाणार्थम् उपमानस्य पश्यामः।
5. तथेत्युपसंहाराद् उपमानसिद्धेः नाविशेषः। इति[21]

तदनन्तरम् शब्दसामान्यपरीक्षा अष्टाभिः सूत्रैः विहिता। तद्यथा-

---

[17] न्यायसूत्रम्-2/1/21-32

[18] न्यायसूत्रम्-2/1/32-35

[19] न्यायसूत्रम् - 2/1/36-37

[20] न्यायसूत्रम्-2/1/38-42

[21] न्यायसूत्रम् 43-47

1. शब्दोऽनुमानम् अर्थस्यानुपलब्धेरनुमेयत्वात्।

2. उपलब्धेः अद्विप्रवृत्तित्वात्।

3. सम्बन्धाच्च।

4. आप्तोपदेश-सामर्थ्यात् शब्दाद् अर्थ-सम्प्रत्ययः।

5. पूरण-प्रदाह-पाटन-अनुपलब्धेश्च सम्बन्धाभावः।

6. शब्दार्थ-व्यवस्थानाद् अप्रतिषेधः।

7. न, सामियकत्वात् शब्दार्थ-सम्प्रत्ययस्य।

8. जातिविशेषे चानियमात्। इति[22]

तदनन्तरं शब्दविशेषपरीक्षा द्वादशभिः सूत्रैः विहिता। तद्यथा-

1. तदप्रामाण्यम् अनृतव्याघातपुनरुक्त-दोषेभ्यः।

2. न, कर्मकर्तृसाधनवैगुण्यात्।

3. अभ्युपेत्य कालभेदे दोषवचनात्।

4. अनुवादोपपत्तेश्च।

5. वाक्यविभागस्य चार्थग्रहणात्।

6. विध्यर्थवादानुवादवचनविनियोगात्।

7. विधिर्विधायकः।

8. स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः।

9. विधिविहितस्य अनुवचनम् अनुवादः।

10. नानुवाद-पुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः।

11. शीघ्रतरगमनोपदेशवद् अभ्यासाद् नाविशेषः।

12. मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यम् आप्तप्रामाण्यात्। इति[23]

एतदनन्तरम् द्वितीयाध्यायस्य द्वितीये आह्निके प्रमाणचतुष्ट्व-परीक्षा विहिता द्वादशभिः सूत्रैः। तद्यथा-

1. न चतुष्ट्वम् ऐतिह्यार्थापत्ति-सम्भवाभावप्रामाण्यात्।

2. शब्द ऐतिह्यानर्थान्तरभावाद् अनुमाने अर्थापत्ति-सम्भवाभावानर्थान्तरभावाच्चा-प्रतिषेधः।

---

[22] न्यायसूत्रम् - 2/1/48-55

[23] न्यायसूत्रम् - 2/1/48-55

3. अर्थापत्तिः अप्रमाणम् अनैकान्तिकत्वात्।

4. अनर्थापत्तौ अर्थापत्त्यभिमानात्।

5. प्रतिषेधाप्रामाण्यं प्रमेयासिद्धेः।

6. तत्प्रमाण्ये वा नार्थापत्त्याप्रमाण्यम्।

7. नाभावप्रमाण्यं प्रमेयासिद्धेः।

8. लक्षितेषु अलक्षणलक्षितत्वाद् अलक्षितानां तत्प्रमेयसिद्धिः।

9. असत्यर्थे नाभाव इति चेन्न, अन्य लक्षणोपपत्तेः।

10. तत्सिद्धेरलक्षितेषु अहेतुः।

11. न, लक्षणावस्थितापेक्षासिद्धेः।

12. प्रागुत्पत्तेरभावोपपत्तेश्च। इति[24]

अवशिष्टाः परीक्षाः विभिन्नप्रकरण-परिवृता विहिताः।

**1. शरीरपरीक्षा** पञ्चभिः सूत्रैः विहिता। तद्यथा-

1. पार्थिवं गुणान्तरोपलब्धेः।

2. पार्थिवाप्यतैजसं तद्गुणोपलब्धेः।

3. निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम्।

4. गन्धक्लेद-पाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्।

5. श्रुतिप्रामाण्याच्च। इति[25]

**1. द्वादशसूत्रैः** इन्द्रियभौतिकत्व-परीक्षा विहिता। तद्यथा-

1. कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः।

2. महदणुग्रहणात्।

3. रश्म्यर्थसन्निकर्षविशेषात् तद् ग्रहणम्।

4. तदनुपलब्धेः अहेतुः।

5. नानुमीयमानस्य प्रत्यक्षतः अनुपलब्धिः अभावहेतुः।

6. द्रव्यगुणधर्मभेदाच्चोपलब्धि-नियमः।

7. अनेकद्रव्यसमवायाद् रूपविशेषाच्चरूपोपलब्धिः।

8. कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः।

---

[24] न्यायसूत्रम् - 2/2/1-12

[25] न्यायसूत्रम 3/1/27-31

9. माद्यन्दिन-उल्काप्रकाश-अनुपलब्धिवत् तदनुपलब्धिः।

10. न रात्रावपि अनुपलब्धेः।

11. आदर्शोदकयोः प्रसादस्वाभाव्याद् रूपोपलब्धियत् तदुपलब्धिः।

12. दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः। इति[26]

**3. अर्थपरीक्षा** अपि द्वादशसूत्रैः विहिता। तद्यथा-

1. गन्ध-रस-रूप-स्पर्श-शब्दानां स्पर्शपर्यन्ताः पृथिव्याः।
2. अप्-तेजो-वायूनां पूर्वपूर्वम् अपोह्याकाशस्योत्तरः।
3. न सर्वगुणानुपलब्धेः।
4. एकैकश्येन उत्तरोत्तर-गुणसद्भावाद् उत्तराणां तदनुपलब्धिः।
5. विष्टं ह्यपरं परेण।
6. न, पार्थिवाप्ययोः प्रत्यक्षत्वात्।
7. पूर्वपूर्वगुणोत्कर्षात् तत् तत् प्रधानम्।
8. तद्व्यवस्थानन्तु भूयस्त्वात्।
9. सगुणानाम् इन्द्रियभावात्।
10. तेनैव तस्याग्रहणाच्च।
11. न शब्दगुणोपलब्धेः।
12. तदुपलब्धिः इतरद्रव्यगुणवैधर्म्यात्। इति[27]

**4. मनसःपरीक्षा** चतुर्भिः सूत्रैः विहिता। तद्यथा-

1. ज्ञानायौगपद्याद् एकं मनः।
2. न, युगपद् अनेक क्रियोपलब्धेः।
3. अलातचक्रदर्शनवत् तदुपलब्धिराशु संचारात्।
4. यथोक्तहेतुत्वात् चाणु। इति[28]

**5. प्रवृति-दोष-सामान्य परीक्षा** सूत्रद्वयेन विहिता। तद्यथा-

1. प्रवृत्तिः यथोक्ता।
2. तथा दोषाः। इति[29]

---

[26] 3/1/40-51

[27] न्यायसूत्रम् 3/1/62-73

[28] न्यायसूत्रम् 3/2/56-59

**6. प्रेत्यभावपरीक्षा** सूत्रचतुष्ट्येन विहिता। तद्यथा-

1. आत्मनित्येत्वे प्रेत्यभावसिद्धिः।

2. व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात्।

3. न घटाद् घटानिष्पत्तेः।

4. व्यक्ताद् घटनिष्पत्तेः अप्रतिषेधः। इति[30]

5. उत्पादव्ययदर्शनात्।

6. बुद्धिसिद्धं तु तदसत्।

7. आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवद् इत्यहेतुः।

8. प्रीतेरात्माश्रयत्वाद् अप्रतिषेधः।

9. न पुत्रपशुस्त्री-परिच्छेद-हिरण्यादि-फलनिर्देशात्।

10. तत्सम्बन्धात् फलनिष्पत्तेः तेषु फलवदुपचारः। इति[31]

दुःखपरीक्षा चतुर्भिः सूत्रैः विहिता। तद्यथा-

1. विविध-बाधनायोगाद् दुःखमेव जन्मोत्पत्तिः।

2. न सुखस्यापि अन्तरालनिष्पत्तेः।

3. बाधनानिवृत्तेर्वेदयतः पर्येषणदोषाद् अप्रतिषेधः।

4. दुःखविकल्पे सुखाभिमानाच्च। [32]

अपवर्ग-परीक्षा दशभिः सूत्रैः विहिता। तद्यथा-

1. ऋणक्लेशप्रवृत्त्यनुबन्धाद् अपवर्गाभावः।

2. प्रधानशब्दानुपपत्तेः गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः।

3. समारोपणाद् आत्मनि अप्रतिषेधः।

4. पात्रचयान्तानुपपत्तेश्च फलाभावः।

5. सुषुप्तस्य स्वप्नादर्शने क्लेशाभावाद् अपवर्गः।

6. न प्रवृत्तिः प्रतिसन्धानाय हीन-क्लेशस्य।

7. न क्लेशसन्ततेः स्वाभाविकत्वात्।

---

[29] न्यायसूत्रम् - 4/1/1-2

[30] न्यायसूत्रम् 4/1/10-13

[31] न्यायसूत्रम् - 4/1/44-54

[32] न्यासूत्रम् - 4/1/55-58

8. प्रागुत्पत्तेः अभावनित्यत्ववत् स्वाभाविकेऽपि अनित्यत्वम्।

9. अणुश्यामताऽनित्यत्ववद् वा।

10. न संकल्प-निमित्तत्वाच्च रागादीनाम्। इति[33]

उद्देश्य-लक्षण-परीक्षाविधायिभ्योतिरिक्तन्यायसूत्राणां, विधानां तिसृणामासाम् अङ्गतया शास्त्रपूरणतया अवस्थितरिति विदन्ति न्यायविद्याविशारदाः। भगवान् गौतमः सर्वविधं पुरुषार्थं जनेभ्यः लम्भयितुकामः वस्तुनः घटादेः उत्पत्तौ प्रत्यक्षानुमित्युपमितिशाब्दप्रमोत्पत्तौ जगदुत्पत्तौ वा किं तावद् असाधारणं कारणं किञ्च साधारणं कारणं कतिविधञ्च तदिति कार्यकारणभावमूलिकां विशिष्टाम् अवधारणां पुरस्कृत्य न्यायसूत्राणि यथा उपपत्ति पुरःसरं यथासंगति रचयति स्म। व्याख्या-तृभिराचार्यैः सोपपत्ति तानि व्याख्यातानि। तद्यथा-

एकं कार्यं घटः गृह्यताम्। अस्य कार्यस्य किमपि कारणम् एष्टव्यं चेत्, कारणता सम्पादकाः केचन विशेषाः अपेक्षणीया भवन्ति। कार्यस्य विपरीतोऽर्थः नित्यः। नित्यस्य पृथिवीपरमाणोः प्रागभावः उत्पत्तिर्वा न सम्भवति। घटः, पटः जगत् दुःखनिवृत्तिः घटादेः, प्रत्यक्षप्रमा, वह्न्यादेः अनुमितिप्रमा गोसदृशोगवयः इति उपमिति प्रमा, सत्यं वदेति शाब्दप्रमा यस्मिन् क्षणे उत्पद्यते ततः प्राक् घटादेः भावस्य निवृत्त्यादेः अभावस्य प्रमाया वा यः अभावः सोऽयम् प्रागभावः कार्यमात्रं प्रतिकारणम् साधारणं स्वीक्रियते। तदुच्यते कार्यं प्रागभावप्रतियोगि। अथ यत् कार्यनियतपूर्ववृत्ति भवति तत्कारणमुच्यते। तदिदं कारणं द्विविधं भवति - साधारणकारणम्, असाधारणकारणं चेति। पार्थिवम् द्वयणुकादि यदुत्पद्यते तत्र परमाण्वादिकं तावद् असाधारणं कारणं भवति ईश्वरः, तदीयेच्छा, तदीयं ज्ञानम्, तदीया कृतिः, दिक्, कालः, द्व्यणुकादेः प्रागभावः, जीवस्य धर्माधर्मौ चेति नव असाधारणकारणानि भवन्ति।[34] यथासङ्गति कार्यकारणभावात्मिकाम् अवधारणां पुरस्कृत्य सूत्रसद्व्याख्यान-समुद्भवं पुण्यं परमात्मनि समर्पयन् न्यायसूचीनिबन्धकारः श्रीवाचस्पतिमिश्रः कथंचिदासाद्यमहेश्वरस्य दास्यं जनस्याप्युपकारमिच्छन्। समस्तसम्पत्समवाप्ति हेतुं तत्प्रत्यभिज्ञामुपपादयामीति[35] श्रीमदुत्पलदेववाचा संवादविशेषमाकलयतीति दर्शनानां परस्परसंवादिता जागर्ति। न्यायसूत्रतात्पर्यविशदीकरण-

---

[33] न्यायसूत्रम् 4/1/59-68

[34] तर्कसंग्रहः विद्याधरी, पृ0141, 143

[35] ईश्वरप्रत्यिभज्ञाकारिका 1/1/1

हेतवे प्रवृत्तानां भाष्यवार्तिकटीकोपटीकादिग्रन्थावगमे शोधालेख एष सोपानायितो भवेदिति मे दृढः प्रत्ययः।।

## सन्दर्भग्रन्थसूची


1. न्याय-कुसुमाञ्जलिः - उदयन, (हरिदास भट्टाचार्य विरचित वृत्त्या प्रभाव्याख्यया विभूषितः) (व्या०) श्रीनारायण मिश्रः, भारतीय विद्या प्रकाशन, वाराणसी, 1968 (प्रथम संस्करण)

2. न्यायभाष्यम् - वात्स्यायन, (सं०) द्वारिकादास शास्त्री, सुधी प्रकाशनम्, वाराणसी, 1986

3. न्यायमञ्जरी - जयन्तभट्ट, (सं०) पं० सूर्यनारायण शुक्ल, जयकृष्णदास हरिदासगुप्त, चौखम्बा संस्कृत सीरीज ऑफिस, बनारस सिटी, 1936

4. न्यायवार्त्तिकम् - उद्योतकर, (सं०) पं० विन्ध्येश्वरी प्रसाद द्विवेदी, एशियाटिक सोसाइटी, कलकत्ता, 1914

5. न्यायसिद्धान्तमुक्तावली - विश्वनाथतर्कपञ्चानन, (प्रत्यक्ष खण्ड), (व्या०) धर्मेन्द्रनाथ शास्त्री, मोतीलाल बनारसीदास, दिल्ली, 2005 (पुनर्मुद्रण, तृतीयसंस्करण)

6. न्यायसिद्धान्तमुक्तावली - विश्वनाथ, (व्या०) ज्वालाप्रसाद गौड़, चौखम्बा संस्कृतप्रतिष्ठान, वाराणसी, 1991 (द्वितीय संस्करण)

7. न्यायदर्शनम् - गौतम, (वात्स्यायनभाष्यसंवलितम्), (सं० एवं अनु०) द्वारिकादासशास्त्री, बौद्धभारती, वाराणसी, 1999 (अभिनव संस्करण)

8. न्यायलीलावती - बल्लभाचार्य, (श्रीभगीरथठक्कुरकृतविवृितिसनाथेनश्रीवर्धमानोपाध्यायकृतप्रकाशेन समुद्भासिता श्रीशङ्करमिश्ररचितकण्ठाभरणेन च समन्विता), (सं०) पं० ढुण्ढिराज शास्त्री, चौखम्बा संस्कृत सीरीज ऑफिस, बनारस सिटी, 1934

9. The Kusumanjali - Udayana Acharya, (with the commentary of Haridas Bhattacharya) (Ed. & Tr.) E.B. Cowell, Baptist Mission Press, Calcutta, 1864

10. The Nyayasutras - Gautam, (With Vatsyayana's Bhashya & Extracts from the Nayayavarttika and the Tatparyatika), (Ed.) Gangadhar Sastri Tailanga, E.J. Lazarus & Co., Benares, 1896 (Volume IX, The Vizianagram Sanskrit Series)